শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮২

*বাণযুদ্ধং নৃগমোক্ষং চ*

প্রদ্যুম্নো রৌক্মিণেযঃ স খলু তৱ কলা শম্বরেণাহৃতস্তং
    হত্বা রত্যা সহাপ্তো নিজপুরমহরদ্রুক্মিকন্যাং চ ধন্যাম্।
ততপুত্রোথানিরুদ্ধো গুণনিধিরৱহদ্রোচনাং রুক্মিপৌত্রীং
    তত্রোদ্বাহে গতস্তৱং ন্যৱধি মুসলিনা রুক্ম্যপি দ্যূতবৈরাত্॥ ১ ॥

বাণস্য সা বলিসুতস্য সহস্রবাহো-
    র্মাহেশ্বরস্য মহিতা দুহিতা কিলোষা।
ত্বতপৌত্রমেনমনিরুদ্ধমদৃষ্টপূর্ৱং
    স্বপ্নেনুভূয ভগৱন্ ৱিরহাতুরাভূত্॥ ২ ॥

যোগিন্যতীৱ কুশলা খলু চিত্রলেখা
    তস্যাঃ সখী ৱিলিখতী তরুণানশেষান্।
তত্রানিরুদ্ধমুষযা ৱিদিতং নিশাযা-
    মানেষ্ট যোগবলতো ভৱতো নিকেতাত্॥ ৩ ॥

কন্যাপুরে দযিতযা সুখমারমন্তং
    চৈনং কথঞ্চন ববন্ধুষি শর্ৱবন্ধৌ।
শ্রীনারদোক্ততদুদন্তদুরন্তরোষৈ-
    স্তৱং তস্য শোণিতপুরং যদুভির্ন্যরুন্ধাঃ॥ ৪ ॥

পুরীপালশৈলপ্রিযদুহিতৃনাথোস্য ভগৱান্
    সমং ভূতব্রাতৈর্যদুবলমশঙ্কং নিরুরুধে।
মহাপ্রাণো বাণো ঝটিতি যুযুধানেন যুযুধে
    গুহঃ প্রদ্যুম্নেন ত্বমপি পুরহন্ত্রা জঘটিষে॥ ৫ ॥

নিরুদ্ধাশেষাস্ত্রে মুমুহুষি তৱাস্ত্রেণ গিরিশে
দ্রুতা ভূতা ভীতাঃ প্রমথকুলৱীরাঃ প্রমথিতাঃ।
পরাস্কন্দত্ স্কন্দঃ কুসুমশরবাণৈশ্চ সচিৱঃ
স কুম্ভাণ্ডো ভাণ্ডং নৱমিৱ বলেনাশু বিভিদে॥ ৬ ॥

চাপানাং পঞ্চশত্যা প্রসভমুপগতে ছিন্নচাপেথ বাণে
ৱ্যর্থে যাতে সমেতো জ্বরপতিরশনৈরজ্বরি ত্বজ্জ্বরেণ।
জ্ঞানী স্তুত্বাথ দত্বা তৱ চরিতজুষাং ৱিজ্বরং স জ্বরোগাত্
প্রাযোন্তর্জ্ঞানৱন্তোপি চ বহুতমসা রৌদ্রচেষ্টা হি রৌদ্রাঃ॥ ৭ ॥

বাণং নানাযুধোগ্রং পুনরভিপতিতং দর্পদোষাদ্বিতন্বন্
নির্লূনাশেষদোশং সপদি বুবুধুষা শঙ্করেণোপগীতঃ।
তদ্বাচা শিষ্টবাহুদ্বিতযমুভযতো নির্ভযং ততপ্রিযং তং
মুক্তৱা তদ্দত্তমানো নিজপুরমগমঃ সানিরুদ্ধঃ সহোষঃ॥ ৮ ॥

মুহুস্তাৱচ্ছক্রং ৱরুণমজযো নন্দহরণে
যমং বালানীতৌ দৱদহনপানেনিলসখম্।
ৱিধিং ৱতসস্তেযে গিরিশমিহ বাণস্য সমরে
ৱিভো ৱিশ্বোতকর্ষী তদযমৱতারো জযতি তে॥ ৯ ॥

দ্বিজরুষা কৃকলাসৱপুর্ধরং
নৃগনৃপং ত্রিদিৱালযমাপযন্।
নিজজনে দ্বিজভক্তিমনুত্তমা-
মুপদিশন্ পৱনেশ্বর পাহি মাম্॥ ১০ ॥

**********